# 5. पण्डिता रमाबाई

**Question 1:**

एकपदेन उत्तरत-

(क) 'पण्डिता' 'सरस्वती' इति उपाधिभ्यां का विभूषिता?

(ख) रमा कुत: संस्कृतशिक्षां प्राप्तवती?

(ग) रमाबाई केन सह विवाहम् अकरोत्?

(घ) कासां शिक्षायै रमाबाई स्वकीयं जीवनम् अर्पितवती?

(ङ) रमाबाई उच्चशिक्षार्थं कुत्र अगच्छत्?

Answer:

(क) रमाबाई।

(ख) स्वमातु:

(ग) विपिनबिहारी दासेन।

(घ) नारीणाम्।

(ङ) इंग्लैण्ड देशम्।

**Question 2:**

रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-

(क) रमाया: पिता समाजस्य प्रतारणाम् असहत।

(ख) पत्यु: मरणानन्तरं रमाबाई महाराष्ट्रं प्रत्यागच्छत्।

(ग) रमाबाई मुम्बईनगरे 'शारदा-सदनम्' अस्थापयत्।

(घ) 1922 तमे ख्रिष्टाब्दे रमाबाई-महोदयाया: निधनम् अभवत्।

(ङ) स्त्रिय: शिक्षां लभन्ते स्म।

Answer:

(क) कस्या: पिता समाजस्य प्रतारणाम् असहत?

(ख) कस्य मरणानन्तरं रमाबाई महाराष्ट्रं प्रत्यागच्छत्?

(ग) रमाबाई कुत्र 'शारदा-सदनम्' अस्थापयत्?

(घ) 1922 तमे ख्रिष्टाब्दे कस्या: निधनम् अभवत्?

(ङ) का: शिक्षां लभन्ते स्म?

**Question 3:**

प्रश्नानामुत्तराणि लिखत-

(क) रमाबाई किमर्थम् आन्दोलनं प्रारब्धवती?

(ख) नि:सहाया: स्त्रिय: आश्रमे किं लभन्ते स्म?

(ग) कस्मिन् विषये रमाबाई-महोदयाया: योगदानम् अस्ति?

(घ) केन रचनाद्वयेन रमाबाई प्रशंसिता वर्तते?

Answer:

(क) रमाबाई बालिकानां स्त्रीणां च कृते संस्कृत्स्य वेदशास्त्रादिकस्य च शिक्षायै आन्दोलनं प्रारब्धवती।

(ख) नि:सहाया: स्त्रिय: आश्रमे मुद्रण - टङ्कण - काष्ठकलादीनाञ्च प्रशिक्षणमपि लभन्ते स्म।

(ग) स्त्रीशिक्षायां समाजसेवायाञ्च विषये रमाबाई-महोदयाया: योगदानम् अस्ति।

(घ) 'स्त्री धर्म नीति' 'हाई कास्ट हिन्दू विमेन' रचनाद्वयेन रमाबाई प्रशंसिता वर्तते।

**Question 4:**

अधोलिखितानां पदानां निर्देशानुसारं पदपरिचयं लिखत-

| पदानि | मूलशब्द: | लिङ्गम् | विभक्ति: | वचनम् |
|---|---|---|---|---|
| यथा- वेदानाम् | वेद | पुँल्लिङ्गम् | षष्ठी | बहुवचनम् |
| पिता | ------------------- | ------------------- | ------------------- | ------------------- |
| शिक्षायै | ------------------- | ------------------- | ------------------- | ------------------- |
| कन्या: | ------------------- | ------------------- | ------------------- | ------------------- |
| नारीणाम् | ------------------- | ------------------- | ------------------- | ------------------- |
| मनोरमया | ------------------- | ------------------- | ------------------- | ------------------- |

Answer:

| पदानि | मूलशब्द: | लिङ्गम् | विभक्ति: | वचनम् |
|---|---|---|---|---|
| यथा-वेदानाम् | वेद | पुँल्लिङ्गम् | षष्ठी | बहुवचनम् |
| पिता | पितृ | पुँल्लिङ्गम् | प्रथमा | एकवचनम् |
| शिक्षायै | शिक्षा | स्त्रीलिङ्गम् | चतुर्थी | एकवचनम् |
| कन्या: | कन्या | स्त्रीलिङ्गम् | प्रथमा | बहुवचनम् |
| नारीणाम् | नारी | स्त्रीलिङ्गम् | षष्ठी | बहुवचनम् |
| मनोरमया | मनोरमा | स्त्रीलिङ्गम् | तृतीया | एकवचनम् |

**Question 5:**

अधोलिखितानां धातूनां लकारं पुरुषं वचनञ्च लिखत-

| | **धातुः** | **लकारः** | **पुरुषः** | **वचनम्** |
|---|---|---|---|---|
| यथा-<br>आसीत् | अस् | लङ् | प्रथमपुरुषः | एकवचनम् |
| कुर्वन्ति | ------------------- | ------------------- | ------------------- | ------------------- |
| आगच्छत् | ------------------- | ------------------- | ------------------- | ------------------- |
| निवसन्ति | ------------------- | ------------------- | ------------------- | ------------------- |
| गमिष्यति | ------------------- | ------------------- | ------------------- | ------------------- |

| अकरोत् | -------------------- | -------------------- | -------------------- | -------------------- |
|---|---|---|---|---|

Answer:

| | **धातुः** | **लकारः** | **पुरुषः** | **वचनम्** |
|---|---|---|---|---|
| यथा-आसीत् | अस् | लङ् | प्रथमपुरुषः | एकवचनम् |
| कुर्वन्ति | 'कृ' | लट् | प्रथमपुरुषः | बहुवचनम् |
| आगच्छत् | 'गम्' | लङ् | प्रथमपुरुषः | एकवचनम् |
| निवसन्ति | 'नि' उपसर्ग 'वस' धातु | लट् | प्रथमपुरुषः | बहुवचनम् |
| गमिष्यति | 'गम्' | लृट् | प्रथमपुरुषः | एकवचनम् |
| अकरोत् | 'कृ' | लङ् | प्रथमपुरुषः | एकवचनम् |

**Question 6:**

अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत-

(क) रमाबाई-महोदयायाः विपिनबिहारीदासेन सह विवाहः अभवत्।

(ख) 1858 तमे ख्रिष्टाब्दे रमाबाई जन्म अलभत।

(ग) सा उच्चशिक्षार्थं इंग्लैण्डदेशं गतवती।

(घ) 1922 तमे ख्रिष्टाब्दे रमाबाई-महोदयायाः निधनम् अभवत्।

(ङ) सा मुम्बईनगरे शारदा-सदनम् अस्थापयत्।

(च) सा स्वमातुः संस्कृतशिक्षां प्राप्तवती।

Answer:

(क) 1858 तमे ख्रिष्टाब्दे रमाबाई जन्म अलभत।

(ख) सा स्वमातुः संस्कृतशिक्षां प्राप्तवती।

(ग) रमाबाई-महोदयायाः विपिनबिहारीदासेन सह विवाहः अभवत्।

(घ) सा उच्चशिक्षार्थं इंग्लैण्डदेशं गतवती।

(ङ) सा मुम्बईनगरे शारदा-सदनम् अस्थापयत्।

(च) 1922 तमे ख्रिष्टाब्दे रमाबाई-महोदयायाः निधनम् अभवत्।